# I B Patel English School (Primary)

**2020 -2021**

**Class – 8**

**PDF**

**Subject – SANSKRIT**

## वन्दना

## वन्दना



जय जय हे भगवति सुरभारति
तव चरणौ प्रणमामः।
नाद ब्रह्ममयि जय वागीश्वरि
शरणं ते गच्छामः ॥ जय ॥
त्वमसि शरण्या त्रिभुवनधन्या
सुरमुनि-वन्दित-चरणा ।
नवरस-मधुरा-कविता-मुखरा
स्मित-रुचि-रुचिराभरणा ॥ जय ॥
आसीना भव मानसहंसे
कुन्द-तुहिन-शशि-धवले ।
हर जडतां कुरु बोधि-विकासं
सित-पङ्कज-तनु-विमले ॥ जय ॥

ललितकलामयि ज्ञान विभामयि
वीणा-पुस्तक-धारिणि।
मतिरास्तां नो तव पद-कमले
अयि कुण्ठाविषहारिणि ॥ जय ॥

## Glossary

**सुरभारति** goddess of speech **वागीश्वरि** goddess of speech **आसीना** sitting **कुन्द** flower of jasmine **तुहिनः** ice **शशि** the moon **धवल** White **पङ्कज** lotus **तनुः** body **मतिः** intelligence **आस्ताम्** may be

### भवान् जानाति किम् ?

- मासे पक्षद्वयं भवति - शुक्लपक्षः, कृष्णपक्षः च।
- सर्पस्य जिह्वाद्वयं भवति।
- त्रयः गुणाः सन्ति - सत्त्वम्, रजः, तमः च।
- चत्वारः आश्रमाः सन्ति - ब्रह्मचर्यम्, गार्हस्थ्यम्, वानप्रस्थम्, संन्यासः च।
- चत्वारः पुरुषार्थाः सन्ति - धर्मः, अर्थः, कामः, मोक्षः च।